# ॥ सर्वतोभद्र मण्डल देवतानां आवाहनम् होमः ॥



ॐ इमं रक्तवर्णन्तु तथाहस्त सुविस्तृतम् । इद्रध्वजं चालभामि महेन्द्राय सुप्रीतये ॥
अमुमिन्द्रध्वजं चित्रं सर्व विघ्न विनाशकम् । अस्मिन् मण्डप पार्श्वे तु स्थापयामि सुरार्चने ॥

प्रागुदीच्यां गता रेखाः कुर्यादेकोनविंशतिम् । खण्डेदुस्त्रिपदैः कोणे श्रृंखला पंचभिः पदैः ॥
एकादशपदा वल्ली भद्रं तु नवभिः पदैः । चतुर्विंशत्पदा वापी परिधिर्विंशतिः पदैः ॥
मध्ये षोडशभिः कोष्ठैः पद्ममष्टदलं स्मृतम् । श्वेतेन्दुः श्रंखला कृष्णावली नीलेन पूरयेत् ॥
भद्रारुणा सिता वापी परिधिः पीतवर्णकः । बाह्यान्तर्दला श्वेत कर्णिका पीतवर्णिका ॥
परिध्यावेष्टितं पद्मं बाह्ये सत्वं रजस्तमः । तन्मध्ये स्थापयेद्देवान् ब्रह्माद्यांश्च सुरेश्वरान् ॥
भद्रेण पूजनाशक्तौ कुर्यमष्टदलं शुभम् । गोधूमान्नेन तत्कार्यं तण्डुलेनाऽथवा शुभम् ॥

## प्रत्येक नाम के आदि में 'ॐ' तथा अन्त में स्वाहा लगाकर हवन करें –

1. ॐ ब्रह्मणे नमः
2. ॐ सोमाय नमः
3. ॐ ईशानाय नमः
4. ॐ इन्द्राय नमः
5. ॐ अग्नये नमः
6. ॐ यमाय नमः
7. ॐ नैर्ऋतये नमः
8. ॐ वरुणाय नमः
9. ॐ वायवे नमः
10. ॐ अष्टवसुभ्यो नमः
11. ॐ एकादश रुद्रेभ्यो नमः
12. ॐ द्वादशादित्येभ्यो नमः
13. ॐ अश्विभ्यां नमः
14. ॐ सपैतृक-विश्वेदेव नमः
15. ॐ सप्तयक्षेभ्यो नमः
16. ॐ भूतनागेभ्यो नमः
17. ॐ गन्धर्वाप्सेरोभ्यो नमः
18. ॐ स्कंदाय नमः
19. ॐ नन्दीश्वराय नमः
20. ॐ शूलमहाकालाभ्यां नमः
21. ॐ दक्षादि सप्तगणेभ्यो नमः
22. ॐ दुर्गायै नमः
23. ॐ विष्णवे नमः
24. ॐ स्वधायै नमः
25. ॐ मृत्यु रोगाभ्यां नमः
26. ॐ गणपतये नमः
27. ॐ अद्भ्यो नमः
28. ॐ मरुदभ्यो नमः
29. ॐ पृथिव्यै नमः
30. ॐ गंगादि नंदीभ्यो नमः
31. ॐ सप्तसागरेभ्यो नमः
32. ॐ मेरवे नमः
33. ॐ गदायै नमः
34. ॐ त्रिशूलाय नमः
35. ॐ वज्राय नमः
36. ॐ शक्तये नमः
37. ॐ दण्डाय नमः
38. ॐ खड्गाय नमः
39. ॐ पाशाय नमः
40. ॐ अंकुशाय नमः
41. ॐ गौतमाय नमः
42. ॐ भरद्वाजाय नमः
43. ॐ विश्वामित्राय नमः
44. ॐ कश्यपाय नमः
45. ॐ जमदग्नये नमः
46. ॐ वसिष्ठाय नमः
47. ॐ अत्रये नमः
48. ॐ अरुन्धत्यै नमः
49. ॐ ऐन्द्रै नमः
50. ॐ कौमार्यै नमः
51. ॐ ब्राह्मयै नमः
52. ॐ वाराह्यै नमः
53. ॐ चामुण्डायै नमः
54. ॐ वैष्णव्यै नमः
55. ॐ माहेश्वर्यै नमः
56. ॐ वैनायक्यै नमः

1. **ब्रह्मणे** **मध्य**

**ॐ ब्रह्म यज्ञानं प्रथमं पुरस्ता द्विसीमतः सुरुचो वेन आवः ।**
**सबुध्न्या उपमा अस्य विष्ठाः सतश्च योनिम सतश्च विवः ॥**

- ॐ भूर्भुवः स्वः ब्रह्मन इहागच्छ । इहतिष्ठ ब्रह्मणे नमः । ब्रह्माणम् आवाहयामि, स्थापयामि, पूजयामि ।

2. **सोमाय** **उत्तर**

**ॐ आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् । भवा वाजस्य संगथे ॥**

- ॐ भूर्भुवः स्वः सोम इहागच्छ । इहतिष्ठ सोमाय नमः । सोमम् आवाहयामि, स्थापयामि, पूजयामि ।

3. **ईशानाय** **ईशान**

**ॐ तमीशानं जगतस्त स्त्थुषस्पतिं धियं जिन्वमवसे हूमहे वयम ।**
**पूषा नो यथा वेद सामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥**

- ॐ भूर्भुवः स्वः ईशान इहागच्छ । इहतिष्ठ ईशानाय नमः । ईशानम् आवाहयामि, स्थापयामि, पूजयामि ।

4. **इन्द्राय** **पूर्व**

**ॐ त्रातारमिन्द्र मवितार मिन्द्र ᳪ हवेहवे सुहव ᳪ शूरमिन्द्रम् ।**
**ह्वयामि शक्रं पुरुहूत मिन्द्र ᳪ स्वस्ति नो मघवा धात्विन्द्रः॥**

- ॐ भूर्भुवः स्वः इन्द्रे इहागच्छ । इहतिष्ठ इन्द्राय नमः । इन्द्रम् आवाहयामि, स्थापयामि, पूजयामि ।

5. **अग्नये** **अग्नि**

**ॐ त्वन्नो अग्ने वरुणस्य विद्वान् देवस्य हेडो अवयासिसीष्ठाः ।**
**यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषा ᳪ सि प्रमुमुग्ध्यस्मत् ॥**

- ॐ भूर्भुवः स्वः अग्ने इहागच्छ । इहतिष्ठ अग्नये नमः । अग्निम् आवाहयामि, स्थापयामि, पूजयामि ।

6. **यमाय** **दक्षिण**

**ॐ यमाय त्वांगिरस्वते पितृमते स्वाहा । स्वाहा घर्माय स्वाहा घर्मः पित्रो ॥**

- ॐ भूर्भुवः स्वः यम इहागच्छ । इहतिष्ठ यमाय नमः । यमम् आवाहयामि, स्थापयामि, पूजयामि ।

7. **नैर्ऋतये** **नैर्ऋत्य**

**ॐ असुन्नवन्तमयजमानमिच्छ स्तेन- स्येत्यामन्विहितस्करस्य ।**
**अन्यमस्मदिच्छ- सात ऽइत्या नमो देवि निर्ऋते तुभ्यमस्तु ॥**

- ॐ भूर्भुवः स्वः निर्ऋते इहागच्छ । इहतिष्ठ निर्ऋतये नमः । निर्ऋतिम् आवाहयामि, स्थापयामि, पूजयामि ।

8. **वरुणाय** **पश्चिम**

**ॐ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः ।**
**अहेडमानो वरुणेह बोध्युरूश ᳪ समानऽ आयुः प्रमोषीः ॥**

- ॐ भूर्भुवः स्वः वरुण इहागच्छ । इहतिष्ठ वरुणाय नमः । वरुणम् आवाहयामि, स्थापयामि, पूजयामि ।

9. **वायवे** **वायव्य**

**ॐ आ नो नियुद्भिः शतिनीभिरध्वर ᳪ सहस्त्रिणी भिरुपया हियज्ञम् । वायोऽ अस्मिन्सवने मादयस्व यूयं पात स्वस्तिभिः सदा नः ॥**

- ॐ भूर्भुवः स्वः वायो इहागच्छ । इहतिष्ठ वायवे नमः । वायुम् आवाहयामि, स्थापयामि, पूजयामि ।

10. **अष्टवसुभ्यो** **वायु-सोम**

**ॐ वसुभ्यस्त्वा रुद्रेभ्यस्त्वा दित्येभ्यस्त्वा संजानाथां द्यावापृथिवी मित्रा वरुणौ त्वा वृष्टयावाताम् । व्यन्तु वयोक्त ᳪ रिहाणा मरुतां पृषनीर्गच्छ । वशा पृश्निर्भूत्वा दिवंगच्छ ततो नो वृष्टि मावह ॥ चक्षुष्पा अग्नेसि चक्षुर्मे पाहि ॥**

- ॐ भूर्भुवः स्वः अष्टवसुभ्य इहागच्छ । इहतिष्ठ अष्टवसुभ्यो नमः । अष्टवसुभ्याम् आवाहयामि, स्थापयामि, पूजयामि ।

11. **एकादश रुद्रेभ्यो** सोम-ईशान

**ॐ नमस्ते रुद्र मन्यव उतोत इषवे नमः । बाहुभ्यामुत ते नमः ॥**

- ॐ भूर्भुवः स्वः एकादश रुद्र इहागच्छ । इहतिष्ठ एकादश रुद्रेभ्यो नमः । एकादश रुद्रान् आवाहयामि, स्थापयामि, पूजयामि ।

12. **द्वादशादित्येभ्यो** ईशान-इन्द्र

**ॐ यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृडयन्तः । आवोर्वाची सुमतिर्ववृत्याद ᳪ होश्चिद्या वरिवो वित्तरासत् ॥**

- ॐ भूर्भुवः स्वः द्वादशादित्येभ्य इहागच्छ । इहतिष्ठ द्वादशादित्येभ्यो नमः । द्वादशादित्यान् आवाहयामि, स्थापयामि, पूजयामि ।

13. **अश्विभ्यां** **इन्द्र-अग्नि**

**ॐ या वां कशा मधुमत्यश्विना सूनृतावती । तया यज्ञं मिमिक्षतम् ॥**

- ॐ भूर्भुवः स्वः अश्विभ्य इहागच्छ । इहतिष्ठ अश्विभ्याम् नमः । अश्विनौ आवाहयामि, स्थापयामि, पूजयामि ।

14. **सपैतृक-विश्वेदेव** अग्नि-यम

**ॐ विश्वे देवास आगत शृणुता म श्रृणुता म इम ᳪ हवम् । एद बर्हिर्निष एदं बर्हिर्निषीदत । उपयाम गृहीतोसि विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेर्भ्य ॥**

- ॐ भूर्भुवः स्वः सपैतृक विश्वेदेव इहागच्छ । इहतिष्ठ सपैतृक विश्वेभ्यो देवभ्यो नमः । सपैतृक विश्वान देवान् आवाहयामि, स्थापयामि, पूजयामि ।

15. **सप्तयक्षेभ्यो** **यम-नैर्ऋत्य**

**ॐ अभि त्वं देवं ᳪ सवितारमोण्योः कविक्रतुमर्चामि सत्यसव ᳪ रत्नधामभि प्रियं कविम् । ऊद् घ्वा यस्यामतिर्भा अदिद्युतत्सवीमनि हिरण्यपाणिरमिमत सुक्रतुः कृपास्वः । प्रजाभ्यस्त्वा । प्रजास्त्वानु प्राणन्तु प्रजास्त्वमनुप्राण्तु प्रजास्त्वमनुप्राणिहि ॥**

- ॐ भूर्भुवः स्वः सप्तयक्षेभ्य इहागच्छ । इहतिष्ठ सप्तयक्षेभ्यो नमः । सप्तयक्षाणम् आवाहयामि, स्थापयामि, पूजयामि ।

16. **भूतनागेभ्यो** नैर्ऋत्य-वरुण

**ॐ नमोस्तु सर्पेभ्यो ये के च प्रथिवी मनु।**
**ये अंतिरिक्षे ये दिवि तेभ्य: सर्पेभ्यो नमः ॥**

- ॐ भूर्भुवः स्वः भूतनागेभ्य इहागच्छ। इहतिष्ठ भूतनागेभ्यो नमः। भूतनागान् आवाहयामि, स्थापयामि, पूजयामि।

17. **गन्धर्वाप्सरोभ्यो** वरुण-वायु

**ॐ ऋताषाड् ऋतधामाग्निर्गन्धर्व, स्तस्यौषधयोऽप्सरसो मुदा नाम।**
**स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहा ॥**

- ॐ भूर्भुवः स्वः गन्धर्वाप्सरोभ्य इहागच्छ। इहतिष्ठ गन्धर्वाप्सरोभ्यो नमः। गन्धर्वाप्सरसः आवाहयामि, स्थापयामि, पूजयामि।

18. **स्कंदाय** ब्रह्म-सोम (उत्तर)

**ॐ यदक्रन्दः प्रथमं जायमान उद्यन्त्समुद्रादुत वा पुरीषात्।**
**श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महि जातं ते अर्वन् ॥**

- ॐ भूर्भुवः स्वः स्कंद इहागच्छ। इहतिष्ठ स्कन्दाय नमः। स्कन्दम् आवाहयामि, स्थापयामि, पूजयामि।

19. **नन्दीश्वराय** ब्रह्म-सोम (उत्तर)

**ॐ आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम्।**
**संक्रन्दनोऽनिमिष एकवीरः शतं ७ सेना अजयत्साकमिन्द्रः ॥**

- ॐ भूर्भुवः स्वः वृषभ इहागच्छ। इहतिष्ठ वृषभाय नमः। वृषभम् आवाहयामि, स्थापयामि, पूजयामि।

20. **शूल-महाकालाभ्यां** उत्तर

**ॐ कार्षिरसि समुद्रस्य त्वा क्षित्या ऽ उन्नयामि।**
**समापो अद्भिरग्मत समोषधीभिरोषधीः ॥**

- ॐ भूर्भुवः स्वः शूल-महाकाल इहागच्छ। इहतिष्ठ शूल-महाकालाय नमः। शूल-महाकालम् आवाहयामि, स्थापयामि, पूजयामि।

21. **दक्षादि सप्तगणेभ्यो**

**ॐ शुक्रज्योतिश्च चित्रज्योतिश्च, सत्यज्योतिश्च ज्योतिष्माँश्च।**
**शुक्रश्च ऋतपाश्चात्य ७ हा ॥**

- ॐ भूर्भुवः स्वः दक्षादि-सप्तगणेभ्य इहागच्छ। इहतिष्ठ दक्षादि-सप्तगणेभ्यो नमः। दक्षादि-सप्तगणान् आवाहयामि, स्थापयामि, पूजयामि।

22. **दुर्गायै** ब्रह्म-इन्द्र मध्य

**ॐ अम्बेऽ अम्बिकेऽ अम्बालिके न मा नयति कश्चन।**
**ससस्त्यश्वकः सुभद्रिकां काम्पील वासिनीम् ॥**

- ॐ भूर्भुवः स्वः दुर्गे इहागच्छ। इहतिष्ठ दुर्गायै नमः। दुर्गाम् आवाहयामि, स्थापयामि, पूजयामि।

23. **विष्णवे** दुर्गा के पूर्व

**ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्य पा ७ सुरे स्वाहा ॥**

- ॐ भूर्भुवः स्वः विष्णु इहागच्छ। इहतिष्ठ विष्णवे नमः। विष्णुम् आवाहयामि, स्थापयामि, पूजयामि।

24. **स्वधायै** ब्रह्मा-अग्नि मध्य

**ॐ पितृभ्यः स्वधायिभ्यः स्वधा। नमः पितामहेभ्यः स्वधा यिभ्यः स्वधा। नमः प्रपितामहेभ्यः स्वधा यिभ्यः स्वधा। नमः अक्षन्पितरो मीमदन्त पितरो तीतृपन्त पितरः पितरः शुन्धद्धवम्॥**

- ॐ भूर्भुवः स्वः स्वधा इहागच्छ। इहतिष्ठ स्वधायै नमः। स्वधम् आवाहयामि, स्थापयामि, पूजयामि।

25. **मृत्यु रोगाभ्यां** ब्रह्म-यम मध्य

**ॐ परं मृत्यो अनु परेहि पन्थां यस्ते अन्य इतरो देवयानात्। चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजा ७ रीरिषो मोत वीरान्॥**

- ॐ भूर्भुवः स्वः मृत्युरोग इहागच्छ। इहतिष्ठ मृत्युरोगैभ्यो नमः। मृत्युरोगान् आवाहयामि, स्थापयामि, पूजयामि।

26. **गणपतये** ब्रह्म-नैर्ऋत्य मध्य

**ॐ गणानान्त्वा गणपति ७ हवामहे प्रियाणान्त्वां प्रियपति ७ हवामहे निधी नान्त्वा निधिपति ७ हवामहे व्वसो मम आहमजानि गर्भधमात्त्वमजासि गर्भधं॥**

- ॐ भूर्भुवः स्वः गणपते इहागच्छ। इहतिष्ठ गणपतये नमः। गणपतिम् आवाहयामि, स्थापयामि, पूजयामि।

27. **अद्भ्यो** ब्रह्म-वरुण मध्य

**ॐ आपो हि ष्ठा मयोभुवस्तान ऊर्जे दधातन। महे रणाय चक्षसे॥**

- ॐ भूर्भुवः स्वः अद्भ्य इहागच्छ। इहतिष्ठ अद्भ्यो नमः। अद्भ्याम् आवाहयामि, स्थापयामि, पूजयामि।

28. **मरुदभ्यो** ब्रह्म-वाय मध्य

**ॐ मरुतो यस्य हि क्षये पाथा दिवो विमहसः। स सुगोपातमो जनः॥**

- ॐ भूर्भुवः स्वः मरुद्भ्यः इहागच्छ। इहतिष्ठ मरुद्भ्यो नमः। मरुद्भ्यम् आवाहयामि, स्थापयामि, पूजयामि।

29. **पृथिव्यै** ब्रह्मा के पाद मूल

**ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी। यच्छा नः शर्म सप्रथाः॥**

- ॐ भूर्भुवः स्वः अनन्त इहागच्छ। इहतिष्ठ अनन्ताय नमः। अनन्तम् आवाहयामि, स्थापयामि, पूजयामि।

30. **गंगादि नदीभ्यो** उत्तर

**ॐ इमं मे वरुण श्रुधी हवमद्या च मृडय। त्वामवस्युरा चके॥**

- ॐ भूर्भुवः स्वः गंगादिनदी इहागच्छ। इहतिष्ठ गंगादिनदीभ्यो नमः। गंगादिनदीः आवाहयामि, स्थापयामि, पूजयामि।

31. **सप्तसागरेभ्यो** उत्तर

**ॐ समुद्रोसि नभस्वानार्द्रदानुः शम्भूर्मयो भूरभि मा वाहि स्वाहा। मरुतोसि मरुतां गणाः शम्भूर्मयो भूरभि मा वाहि स्वाहा। अवस्यूरसि दुवस्वाञ्छम्भूर्मयो भूरभि मा वाहि स्वाहा॥**

- ॐ भूर्भुवः स्वः सप्तसागरः इहागच्छ। इहतिष्ठ सप्तसागरेभ्यो नमः। सप्तसागरान् आवाहयामि, स्थापयामि, पूजयामि।

32. **मेरवे** कर्णिका परिधि

**ॐ प्र पर्वतस्य वृषभस्य पृष्ठान्नावश्चरन्ति स्वसिच ऽ इयाना: । ता ऽ आववृत्रन्नधरागुदक्ता ऽ अहिं बुध्न्यमनु रीयमाणा: । विष्णोर्विक्रमणमसि विष्णोर्विक्रान्तमसि विष्णो: क्रान्तमसि ॥**

- ॐ भूर्भुवः स्वः मेरवे इहागच्छ । इहतिष्ठ मेरवे नमः । मेरुम् आवाहयामि, स्थापयामि, पूजयामि ।

33. **गदायै** सत्व के बाहर

**ॐ गणानान्त्वा गणपति ७ हवामहे प्रियाणान्त्वां प्रियपति ७ हवामहे निधी नान्त्वा निधिपति ७ हवामहे व्वसो मम आहमजानि गर्भधमात्त्वमजासि गर्भधं ॥**

- ॐ भूर्भुवः स्वः गदाये इहागच्छ । इहतिष्ठ गदायै नमः । गदाम् आवाहयामि, स्थापयामि, पूजयामि ।

34. **त्रिशूलाय** ईशान

**ॐ त्रि ७ शद्धाम विराजति वाक् पतङ्गाय धीयते । प्रति वस्तोरह द्युभि: ॥**

- ॐ भूर्भुवः स्वः त्रिशूल इहागच्छ । इहतिष्ठ त्रिशूलाय नमः । त्रिशूलम् आवाहयामि, स्थापयामि, पूजयामि ।

35. **वज्राय** सत्व परिधि पूर्वे

**ॐ महाँ२ इन्द्रो वज्रहस्त: षोडशी शर्म यच्छतु । हन्तु पाप्मानं योस्मान्द्वेष्टि । उपयाम गृहीतोसि महेन्द्राय त्त्वैष ते योनिर्महेन्द्राय त्त्वा ॥**

- ॐ भूर्भुवः स्वः वज्राय इहागच्छ । इहतिष्ठ वज्राय नमः । वज्रम् आवाहयामि, स्थापयामि, पूजयामि ।

36. **शक्तये** सत्व परिधि अग्नि

**ॐ वसुचमे, वसतिश्चमे, कर्मचमे, शक्तिश्चमे, अर्थश्चम, एमश्चम, इत्याचमे, गतिश्चभे यज्ञेन कल्पन्ताम् ॥**

- ॐ भूर्भुवः स्वः शक्तये इहागच्छ । इहतिष्ठ शक्तये नमः । शक्तिम् आवाहयामि, स्थापयामि, पूजयामि ।

37. **दण्डाय** सत्व परिधि दक्षिण

**ॐ इड एह्यदित एहि काम्या एत । मयि व: कामधरणं भूयात् ॥**

- ॐ भूर्भुवः स्वः दण्डाये इहागच्छ । इहतिष्ठ दण्डाय नमः । दण्डम् आवाहयामि, स्थापयामि, पूजयामि ।

38. **खड्गाय** सत्व परिधि नैर्ऋत्य

**ॐ खड्गो वैश्वदेव: श्वा कृष्ण: कर्णो गर्दभस्तरक्षुस्ते रक्षसामिन्द्राय सूकर: सि ७ हो मारुत: कृकलास: पिप्पका शकुनिस्ते शरव्यायै विश्वेषां देवानां पृषत: ॥**

- ॐ भूर्भुवः स्वः खड्ग इहागच्छ । इहतिष्ठ खड्गाय नमः । खड्गम् आवाहयामि, स्थापयामि, पूजयामि ।

39. **पाशाय** सत्व परिधि पश्चिम **ॐ उदुत्तमं वरुण पाशमस्मदवाधमं विमध्यम ७ श्रथाय। अथा वयमादित्य व्रते तवानागसो अदितये स्याम ॥**

- ॐ भूर्भुवः स्वः पाश इहागच्छ। इहतिष्ठ पाशाय नमः। पाशम् आवाहयामि, स्थापयामि, पूजयामि।

40. **अंकुशाय** सत्व परिधि वायव्य **ॐ अ ७ शुश्च मे, रश्मिश्च मे, दाभ्यश्च मे, धिपतिश्च म, उपा ७ शुश्च मे, न्तर्यामश्च म, ऐन्द्रवायवश्च मे, मैत्रावरुणश्च मे, आश्विनश्च मे, प्रतिप्रस्थानश्च मे, शुक्रश्च मे, मन्थीच मे, यज्ञेन कल्पन्ताम् ॥**

- ॐ भूर्भुवः स्वः अंकुश इहागच्छ। इहतिष्ठ अंकुशाय नमः। अंकुशम् आवाहयामि, स्थापयामि, पूजयामि।

41. **गौतमाय** रक्त परिधि उत्तर **ॐ आयं गौः पृश्निरक्रमीदसदन् मातरं पुरः। पितरंच प्रयन्त्स्वः ॥**

- ॐ भूर्भुवः स्वः गौतम इहागच्छ। इहतिष्ठ गौतमाय नमः। गौतमम् आवाहयामि, स्थापयामि, पूजयामि।

42. **भरद्वाजाय** रक्त परिधि ईशान **ॐ अयं दक्षिणा व्विश्वकर्म्मा तस्य मनो व्वैश्वकर्म्मणं ग्रीष्मो मानस स्त्रिष्टुव्ग्रैष्म्मी त्रिष्टुभः स्वार ७ स्वारा दन्तर्य्यामो न्तर्य्यामात्पञ्चदशः पञ्चदशद् बृहद्भरद्वाज ऽऋषिः। प्रजापतिगृहीतया त्वया मनो गृह्णामि प्रजाभ्यः ॥**

- ॐ भूर्भुवः स्वः भरद्वाज इहागच्छ। इहतिष्ठ भरद्वाजाय नमः। भरद्वाजम् आवाहयामि, स्थापयामि, पूजयामि।

43. **विश्वामित्राय** रक्त परिधि पूर्व **ॐ इदमुत्तरात्स्वस्तस्य श्रोत्र ७ सौव ७ शरच्छोत्र्यनुष्टुप् शारद्यनुष्टुभ एडमैडान्मन्थी मन्थिन ऽएकवि ७ शाद् द्वैराजं व्विश्वामित्र ऽऋषिः प्रजापति गृहीतया त्वया श्श्रोत्रं गृह्णामि प्रजाब्भ्य : ॥**

- ॐ भूर्भुवः स्वः विश्वामित्र इहागच्छ। इहतिष्ठ विश्वामित्राय नमः। विश्वामित्रम् आवाहयामि, स्थापयामि, पूजयामि।

44. **कश्यपाय** रक्त परिधि अग्नि **ॐ त्रायुषं जमदग्नेः कश्यपश्य त्रायुषं। यद्देवेषु त्रायुषं तन्नो अस्तु त्रायुषं ॥**

- ॐ भूर्भुवः स्वः कश्यप इहागच्छ। इहतिष्ठ कश्यपाय नमः। कश्यपम् आवाहयामि, स्थापयामि, पूजयामि।

45. **जमदग्नये** रक्त परिधि दक्षिण **ॐ अयं पश्चा द्विश्वव्यचास्तस्य चक्षुर्व्वैश्रवव्यचसं वर्षाश्चाक्षुष्यो जगती वार्षी जगत्त्या ऽऋक्स्सममृक्स्सामाच्छुक्रः शुक्रात्सप्तदश : सप्तदशाद्द्वैरुपं जमदग्नि ऋषिः प्रजापति गृहीतया त्वया चक्षुर्गृह्णामि प्रजाब्भ्य : ॥**

- ॐ भूर्भुवः स्वः जमदग्न इहागच्छ। इहतिष्ठ जमदग्नये नमः। जमदग्नम् आवाहयामि, स्थापयामि, पूजयामि।

46. **वसिष्ठाय** रक्त परिधि नैर्ऋत्य **ॐ अयं पुरो भुवस्तस्य प्राणो भौवायनो वसन्त : प्राणाय नो गायत्री वासन्ती गायत्र्यै गायत्रं गायत्रादुपा ७ शुरुपा ७ शोस्त्रिवृत्रिवृतो रथन्तरं वसिष्ठ ऽऋषि: प्रजापति गृहीतया त्वया प्राणं गृह्णामि प्रजाब्भ्य ॥**

- ॐ भूर्भुवः स्वः वसिष्ठ इहागच्छ। इहतिष्ठ वसिष्ठाय नमः। वसिष्ठम् आवाहयामि, स्थापयामि, पूजयामि।

47. **अत्रये** रक्त परिधि पश्चिम **ॐ अत्र पितरो मादयद्धवं यथाभागमावृषायद्धवम्। अमीमदन्त पितरो यथाभागमा वृषायिषत ॥**

- ॐ भूर्भुवः स्वः अत्रय इहागच्छ। इहतिष्ठ अत्रये नमः। अत्रिम् आवाहयामि, स्थापयामि, पूजयामि।

48. **अरुन्धत्यै** रक्त परिधि वायव्य **ॐ तं पत्नीभिरनुगच्छेम देवाः पुत्रैर् भ्रातृभिरुतवा हिरण्यैः। नाकं गृभ्णानाः सुकृतस्य लोके तृतीये पृष्ठे अधिरोचने दिवः ॥**

- ॐ भूर्भुवः स्वः अरुन्ध इहागच्छ। इहतिष्ठ अरुन्धत्यै नमः। अरुन्धतीम् आवाहयामि, स्थापयामि, पूजयामि।

49. **ऐन्द्रै** कृष्ण परिधि पूर्व **ॐ आदित्यै रास्नासीन्द्राण्या उष्णीषः। पूषासि घर्माय दीष्व ॥**

- ॐ भूर्भुवः स्वः ऐन्द्र इहागच्छ। इहतिष्ठ ऐन्द्रयै नमः। ऐन्द्रीम् आवाहयामि, स्थापयामि, पूजयामि।

50. **कौमार्यै** कृष्ण परिधि अग्नि **ॐ अम्बेऽ अम्बिकेऽ अम्बालिके न मा नयति कश्चन। ससस्त्यश्वकः सुभद्रिकां काम्पील वासिनीम् ॥**

- ॐ भूर्भुवः स्वः कौमार्यै इहागच्छ। इहतिष्ठ कौमार्यै नमः। कौमारीम् आवाहयामि, स्थापयामि, पूजयामि।

51. **ब्राह्मयै** कृष्ण परिधि दक्षिण **ॐ इन्द्रा याहि धियेषितो विप्रजूतः सुतावतः। उपब्रम्हाणि वाग्घतः ॥**

- ॐ भूर्भुवः स्वः ब्राह्मय इहागच्छ। इहतिष्ठ ब्राह्मयै नमः। ब्राह्मीम् आवाहयामि, स्थापयामि, पूजयामि।

52. **वाराह्यै** कृष्ण परिधि नैर्ऋत्य **ॐ आयंगौः पृश्निरक्रमीदसदन्मातरं पुरः। पितरश्च प्रयन्त्स्वः ॥**

- ॐ भूर्भुवः स्वः वाराह इहागच्छ। इहतिष्ठ वाराह्यै नमः। वाराहीम् आवाहयामि, स्थापयामि, पूजयामि।

53. **चामुण्डायै** कृष्ण परिधि पश्चिम **ॐ अम्बेऽ अम्बिकेऽ अम्बालिके न मा नयति कश्चन। ससस्त्यश्वकः सुभद्रिकां काम्पील वासिनीम् ॥**

- ॐ भूर्भुवः स्वः चामुण्डा इहागच्छ। इहतिष्ठ चामुण्डायै नमः। चामुण्डाम् आवाहयामि, स्थापयामि, पूजयामि।

54. **वैष्णव्यै** कृष्ण परिधि वायव्य **ॐ आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् । भवा वाजस्य संगथे ॥**

- ॐ भूर्भुवः स्वः वैष्णव्य इहागच्छ । इहतिष्ठ वैष्णव्यै नमः । वैष्णवीम् आवाहयामि, स्थापयामि, पूजयामि ।

55. **माहेश्वर्यै** कृष्ण परिधि उत्तर **ॐ या ते रुद्र शिवा तनूरघोराऽ पापकाशिनी ।**
**तया नस्तन्न्वा शंतमया गिरि शन्ताभि चाकशीहि ॥**

- ॐ भूर्भुवः स्वः माहेश्वर्य इहागच्छ । इहतिष्ठ माहेश्वर्यै नमः । माहेश्वरीम् आवाहयामि, स्थापयामि, पूजयामि ।

56. **वैनायक्यै** कृष्ण परिधि ईशान **ॐ समख्ये देव्या धिया सन्दक्षिणयो रुचक्षसा ।**
**मा म ऽ आयुः प्रमोषीर्मोऽ अहं तव वीरं विदेय तव देवि सन्दृशि ॥**

- ॐ भूर्भुवः स्वः वैनायक्य इहागच्छ । इहतिष्ठ वैनायक्यै नमः । वैनायकीम् आवाहयामि, स्थापयामि, पूजयामि ।

- हस्ते अक्षतानादाय मनोजूतिरीति मन्त्रेण सर्वदोभद्र मण्डल देवता सुप्रतिष्ठिताः वरदा भवन्तु ।
- इति प्रतिष्ठाप्य नाममन्त्रैः षोडषोपचारैः सम्पूजयेत् ।
- अनया पूजया ब्रह्माद्यावाहित सर्वतोभद्र मण्डल देवताः प्रीयन्तां न मम ।

- **प्रार्थना** **ॐ ब्रह्माद्यावाहित देवाः सर्वतोभद्र मण्डले ।**
**पूजां गृह्णीत् मद् दत्तां सर्वदा मे प्रसीदत ॥**

**॥ इति सर्वतोभद्र मण्डल देवता स्थापनम् पूजनम् समाप्तम् ॥**